॥ श्रीः ॥

चौखम्भा राजमाता ग्रन्थमाला

६

रूपदीपिका

महामहोपाध्यायपण्डितविन्ध्येश्वरीप्रसादद्विवेदिनः प्रपौत्रेण

रामानन्दद्विवेदिना

विरचिता

चौखम्भा ओरियन्टालिया

प्राच्यविद्या तथा दुर्लभ ग्रन्थों के प्रकाशक एवं वितरक

वाराणसी दिल्ली

प्रकाशक

चौखम्भा ओरियन्टालिया

पोस्ट बाक्स नं० १०३२

वाराणसी-२२१००१ (उ० प्र०) भारत

टेलीफोन : ६३३५४ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

(करोड़ीमल कालेज के पास)

दिल्ली-११० ००७ टेलीफोन : २९११६१७

© **चौखम्भा ओरियन्टालिया**

प्रथम संस्करण १९८६

मूल्य रु० १०-००

मुद्रक :—

श्रीगोकुल मुद्रणालय

गोपाल मन्दिर लेन,

वाराणसी-२२१ ००१

CHAUKHAMBHA RAJMATA SERIES
NO. 6

RŪPADĪPIKĀ

by

ŚRĪ RĀMĀNANDA DWIDEDĪ

CHAUKHAMBHA ORIENTALIA
A House of Oriental and Antiquarian Books
VARANASI DELHI

Publishers :

CHAUKHAMBHA ORIENTALIA

Post Box No. 1032

VARANASI-221001 (India)

Telephone : 63354 Telegram : Gokulotsav

Branch—Bungalow Road, 9 U. B. Jawahar Nagar

(Near Kirorimal College)

DELHI-110 007 Phone : 2911617

Printers :—

Srigokul Mudranalaya

Gopal Mandir Lane,

Varanasi-221 001

अनुक्रमः

मङ्गलाचरणम्	...	७
रूपान्विति:	...	८
शब्दरूपम्	...	८
उपपदीया अपि विभक्तय:	...	११
–उदाहरणमाला	...	१३
–नियमा:	...	१४
तद्धितम्	...	१४
धातुरूपम् (कृदन्तम्)	...	१४
सोपसर्गसंज्ञा	...	१७
सोपसर्गधातु:	...	१७
गणविकरणा:	...	१८
सन्धिविचार:	...	१९
सन्धि:	...	२१
–उदाहरणमाला	...	२२
–नियमा:	...	२३
समास:	...	२४
वाच्यपरिवर्तनम्–उदाहरणमाला	...	२५
–नियमा:	...	२५
प्रेरणार्थका:–उदाहरणमाला	...	२६
–नियमा:	...	२६
स्त्रीप्रत्यया:–नियमा:	...	२७
लिङ्गानुशासनम्	...	२८

श्रीरामानन्दद्विवेदिना महता प्रयासेन लिखिता रूप-दीपिका मया यत्र तत्र पठिता। पद्यबद्धेयं बालोपयोगिनी कण्ठस्थीकरणयोग्या कृतिः लोके प्रचारं लभतामिति मदीयं शुभाशंसनम्।

दीपावली
दिनांक १-११-१९८६

त्रिपाठिकरुणाप्रतिः

॥ श्रीः ॥

रूपदीपिका

मङ्गलाचरणम्

(निवेदनम्)

वाणीविनायकौ वन्दे गौरीमहेश्वरौ वरौ।
लक्ष्मीनारायणौ दिव्यौ मातृपितृजनौ हितौ॥

यज्ञोदानतपः क्रियाः सुचरिता ह्युच्चार्य यज्ज्ञानिनां,
यस्योच्चारणमाश्रयश्चितिधिये देहाभिमानं त्यजेत्।
यस्मिन्नेव समाहिताश्च निखिला वाण्यो नृकण्ठोदिता
ध्यायेद् विश्वहिरण्यगर्भसुवशीत्याख्यं तदेकाक्षरम्॥

आर्या—

महामहोपाध्यायद्विवेदी विन्ध्येश्वरीप्रसादश्च।
पूज्य-वृद्धपितामहो विद्याशोधसुकृती विद्वान्॥

अनुष्टुप्—

श्रीरामनाथपौत्रेण कृष्णारामात्मजेन हि।
स्याद् रूपदीपिका दीप्ता रामानन्दद्विवेदिना॥
पिता प्राक्पदमाकल्प्य चाग्रे मामादिशत् तथा।
लोकहितां पितुराज्ञां कर्तुं मे द्विगुणं सुखम्॥
पूर्वाचार्यैस्तु यत् प्रोक्तं चैषा तदंशदीपिका।
न प्रतिस्थापनायैषा किञ्चिदेवोपसाधिका॥

रूपान्वितिः

पुरुषा हि त्रयो वाण्यामस्ति सः प्रथमः स्मृतः ।
त्वमसि मध्यमो ज्ञेयश्चाहमस्मि तथोत्तमः ॥
वचांसि संस्कृते त्रीणि ह्येकः क्रीडति बालकः ।
क्रीडतो बालकौ द्वौ च क्रीडन्ति बहुबालकाः ॥
लिङ्गानि नामतस्त्रीणि पुंस्त्वं स्त्रीत्वं नपुंसकम् ।
एको बालः फलं चैकमेका च बालिका तथा ॥
वर्तते देववाण्यां न लिङ्गभेदस्तिङन्तके ।
पठति बालकः पाठं तथा पठति बालिका ॥
कारके वचने लिङ्गे विशेषण-विशेष्ययोः ।
साम्यं यथा नवो बालो नवा बाला नवं फलम् ॥

शब्दरूपम्

(कोऽयम्)

कोऽयम् पठति सभ्राता कं तं पाठयते गुरुः ।
केन सुचरितो धर्मः कस्मै च रोचते धनुः ॥
कस्माद् दूरं द्विषो यान्ति कस्यैव भ्रातरस्त्विमे ।
कस्मिन् शक्तिः छविः शीलमेतद् ब्रूहि समासतः ॥
योऽसौ पठति सभ्राता यं तं पाठयते गुरुः ।
येन सुचरितो धर्मः यस्मै च रोचते धनुः ॥
यस्माद् दूरं द्विषो यान्ति यस्यैव भ्रातरस्त्विमे ।
यस्मिन् शक्तिः छविः शीलं स श्रीरामः प्रकीर्तितः ॥

(संज्ञा)

रामः पठति सभ्राता रामं पाठयते गुरुः ।
रामेण चरितो धर्मः रामाय रोचते धनुः ॥
रामाद् दूरं द्विषो यान्ति रामस्य भ्रातरस्त्विमे ।
रामे शक्तिः छविः शीलं हे राम, सर्वतो जहि ॥

कृष्णः क्रीडति बालेषु कृष्णं माता प्रपश्यति।
कृष्णेन गूंजिता वंशी दधि कृष्णाय रोचते॥
कृष्णाद् दूरं भयं सर्वं कृष्णस्य सुहृदस्त्वमे।
कृष्णे शोभा बलं बुद्धिः हर्ष हे कृष्ण! वर्धय॥

उदयते हरिः प्रातः वन्दन्ते ऋषयो हरिम्।
हरिणा मोदते लोको हरये चार्घ्यमर्पितम्॥
हरेः प्रकाशमाप्नोति चारोग्याय हरेः प्रभा।
हरौ श्रद्धा ध्रुवा मे स्याद् धियं प्रेरय हे हरे॥

उदयते रविः प्रातः वन्दन्ते ऋषयः रविम्।
रविना मोदते लोको रवये चार्घ्यमर्पितम्॥
रवेः प्रकाशमाप्नोति चारोग्याय रवेः प्रभा।
रवौ श्रद्धा ध्रुवा मे स्याद् धियं प्रेरय हे रवे॥

भानुरुदयते प्रातः भानुं हि वन्दते ऋषिः।
भानुना मोदते लोको भानवे चार्घ्यमर्पितम्॥
भानोः प्रकाशमाप्नोति भानोश्चारोग्यदा प्रभा।
भानौ श्रद्धा ध्रुवा मे स्याद् भानो, प्रेरय मे धियम्॥

भगवान् भावनीयो हि भगवन्तं भजे त्वहम्।
भगवता जगद् भाति भगवते नमो नमः॥
भगवतो नृसम्बन्धः सर्वे भगवतो जनाः।
भगवति रतिर्मे स्याद् भगवन् मां समुद्धर॥

वन्द्या रमा रमां वन्दे श्रीरस्तु रमया सह।
विष्णुभक्तिप्रदा तस्मात् रमायै सततं नमः॥
रमायाः कार्यसंसिद्धिः रमायाः स्वजने कृपा।
रमायां हि गुणाः सर्वे हे रमे देहि मे वरम्॥

का निहन्ति दुराचारं कां हि देवाः स्तुवन्ति वै।
कया कृतानि कर्माणि कस्यै भूयो नमोनमः॥

कस्याः प्राप्नोति संसिद्धिं कस्याः स्तुतिर्भयापहा ।
कस्यां ध्रुवा सतां श्रद्धा चैतद् ब्रूहि समासतः ॥

या निहन्ति दुराचारं यां हि देवाः स्तुवन्ति वै ।
यया कृतानि कर्माणि यस्यै भूयो नमो नमः ॥
यस्याः प्राप्नोति संसिद्धिं यस्याः स्तुतिर्भयापहा ।
यस्यां ध्रुवा सतां श्रद्धा सा हि देवी प्रकीर्तिता ॥

देवी हन्ति दुराचारं देवीं देवाः स्तुवन्ति वै ।
देव्या कृतानि कर्माणि देव्यै तस्यै नमो नमः ॥
देव्याः प्राप्नोति संसिद्धिं देव्याः स्तुतिर्भयापहा ।
देव्यां श्रद्धा दृढ़ा मे स्याद् हे देवि, देहि मे वरम् ॥

पवित्रं परमं ज्ञानं श्रद्धावाञ्ज्ञानमृच्छति ।
ज्ञानेनैव भयं नष्टं विद्या ज्ञानाय वाञ्छिता ॥
ज्ञानाद् ऋते न मुक्तिः स्यात् निष्ठा ज्ञानस्य मे भवेत् ।
ज्ञाने समाप्यते कर्म हे ज्ञान, तिमिरं हर ॥

ब्रह्मैकं विभुरात्मा वै किं भयं ब्रह्म जानतः ?
जानाति ब्रह्मणा सर्वं सर्वं हि ब्रह्मणे प्रियम् ॥
न ब्रह्मणः परं किञ्चित् ब्रह्मणो नेशितादयः ।
ब्रह्मणि द्यौश्च भूः प्राणाः हे ब्रह्मन् दूरयद्विधाम् ॥

(सर्वनामानि अहम्)

अहं स्मरामि श्रीरामं मां रक्षतु रघूत्तमः ।
मया चाराधितो देवः मह्यं भक्तिं प्रयच्छतु ॥
कुतर्को यातु मद्दूरं श्रद्धाऽस्तु हृदये मम ।
राघवेन्द्रो रमानाथो रामो मयि प्रसीदतु ॥

(त्वम्)

त्वं माता च पिता त्वं वै त्वां जाने बन्धुमात्मनः ।
घतं त्वयात्मनीनत्वं तुभ्यं सख्यपदं प्रदम् ॥

त्वदन्यत् किं धनं चेह विद्यारूपं तवैव हि।
त्वयि तिष्ठति वै श्रेयः त्वं सर्वं मम हे प्रभो॥

उपपदीया अपि विभक्तयः

प्रथमा

प्रभू राम इति ख्यातो लक्ष्मणो नाम चानुजः।
स भाति वन्द्यते सोऽपि हे राम, सततं जय॥

द्वितीया

रामं पश्यति कौशल्या रामं प्रश्नं च पृच्छति।
सरामं शोभते सीता राममनु च लक्ष्मणः॥
रामो याति वने क्रोशं रामं गच्छन्ति वै जनाः।
रामं च लक्ष्मणं चैव ह्यन्तरा याति जानकी॥

श्रीरामं परितो वीराः श्रीरामं निकषा कपिः।
राममधिवसत्येव श्रीर्विजयो धृतिर्मतिः॥
यत्सुखं परमं लोके न राममन्तरेण तत्।
तं रामं शरणं यामि रामं प्रति निवेदये॥

तृतीया

रामेण सह वै सीता धर्मसंस्थापनेच्छया।
वनं याति तथा तत्र वसति तेन हेतुना॥
रामः साधुः प्रकृत्या च जटाभिश्च प्रतीयते।
जयन्तश्चक्षुषा काणो लब्ध्वा रामेण वै क्षमाम्॥

दुःखेन स ह्यनिर्विण्णो नाम्ना रामो नरोत्तमः।
रामेण लभते सौख्यं रामेण रावणो हतः॥
श्रीरामेण विना सौख्यं लभ्यते न कथञ्चन।
रामेण किमिति ज्ञात्वा रामेणालं सते न हि॥

श्रीरामेण विहीनस्य किं वृथा जीवितेन च।
रामेण सदृशो नास्ति बन्धुरन्यः कुतश्चन॥

चतुर्थी

रामाय दीयते राज्यं वनं रामाय रोचते ।
धारयामश्च रामाय सौख्यं रामाय वै नमः ॥
रामाय द्रुह्यति द्वेषी स च रामाय कुप्यति ।
प्रभवति तथा रामो रावणाय न संशयः ॥

रामाय चानसूयन्तः रामार्चनाय प्रस्तुताः ।
धर्माचारोऽस्ति रामाय रामाय स्पृहयाम्यहम् ।

पञ्चमी

कश्चिद् रामाद् गरीयान्न नास्ति रामाद् द्वितीयकः ।
रामाद् दूरं द्विषो रामात् कस्य हर्षो न जायते ॥
पूर्वं राज्याभिषेकाद्धि रामाद् दुष्टो विलीयते ।
निवारयति सः पापाज् जनः पापाज्जुगुप्सते ॥

रामात्सर्वं च गृह्णाति रामाद् विना कुतः सुखम् ।
आमूलाद्धि कथां श्रुत्वा रामादन्यश्च नेप्सितः ॥

षष्ठी

आविर्भावश्च रामस्य हेतोर्धर्मस्य नान्यथा ।
तुल्यो नास्ति च रामस्य रामस्य बहवो गुणाः ॥
श्रीरामस्य कृते वीराः वानराश्च युयुत्सवः ।
श्रीरामस्य सकाशं च दूरं च प्रसृतो मुदा ॥

रामस्य वामतः सीता दक्षिणतश्च लक्ष्मणः ।
पुरतो मारुतिस्तस्य तस्य स्मरामि सर्वदा ॥

सप्तमी

वनं गच्छति रामे च प्रस्थिता जानकी मुदा ।
शस्त्रे दक्षो हरिः हन्ति मायामृगं च चर्मणि ॥
जटा च शोभते रामे रामो लग्नो रणे तथा ।
श्रीरामे चागते युद्धाद् मोदन्ते सकला जनाः ॥

मोक्षे चेच्छास्ति चेत्तर्हि यत्ने कृते स सिद्धयति ।
रामेषु राघवः स्तुत्यो धृतो येन जनः करे ॥
धन्यः स नृषु रामेण धृतः करेण यः करे ।

उत्तरस्थः पाठः

प्रथमा

प्रथमा नाममात्रे च सम्बोधने त्वितिग्रहे ।
कर्तरि कर्तृवाच्यस्य कर्मवाच्यस्य कर्मणि ॥

द्वितीया

ऋतेविनादिभिर्योगे द्वितीया कर्मणीष्यते ।
धिक्प्रतीत्यादिभिश्चैव योज्या क्रियाविशेषणे ॥

तृतीया

तृतीया करणे योज्या कर्मवाच्यस्य कर्तरि ।
ऊनवारणहेत्वर्थैः सदृशार्थैः सहग्रहे ॥

चतुर्थी

चतुर्थी सम्प्रदाने च नमोयोगे तथाशिषि ।
रुच्यर्थानाञ्च सुप्रीतौ तादर्थ्ये च क्रियायुते ॥

पञ्चमी

पञ्चमी स्यादपादाने हेत्वर्थे तु विभाषया ।
ऋतेपूर्वादिभिर्योगे ल्यबर्थे च भये तथा ॥

षष्ठी

षष्ठी योज्या तु सम्बन्धे कृदन्ते कर्तृकर्मणोः ।
तथा तुल्यार्थयोगे सा कृत्यानां कर्तृकारके ॥

सप्तमी

आधारे सप्तमी योज्या भावे तु कर्मयोजने ।
षष्ठी वा सप्तमी योज्या निर्धारे च ह्यनादरे ॥

उपसंहारः

विभक्तिकारके योज्या क्रमान्न, कर्मवाच्यके ।
तृतीया कर्तरीहैव कर्मणि प्रथमा यथा ॥

विभाषया

द्वितीया वा चतुर्थी वा विभक्तिश्च विभाषया ।
गत्यर्थकर्मणि स्याद्धि तु चेष्टायामनध्वनि ॥
ऋतेविनादिभिर्योगे द्वितीया वा च पञ्चमी ।
तृतीया पञ्चमी वा स्याद् हेत्वर्थे च विभाषया ॥

योज्या षष्ठी तृतीया वा कृत्यानां कर्तृकारके ।
तुल्यार्थैरतुलोपम्ये विभक्तिश्चद् विभाषया ॥
तृतीया सप्तमी वा स्यान् प्रसिते चोत्सुके तथा ।
अनादरे च निर्धारे षष्ठी वा सप्तमी भवेत् ॥

तद्धितम्

वेद्यो हि धारणाद् धर्मः सत्यधर्मी सदा जयेत् ।
धर्म्यमेव हि कर्तव्यं भुवि धन्योस्ति धर्मवान् ॥
शब्दितं धार्मिकत्वं यद् धारयेत् सर्वमात्मवत् ।
स कुलीनो गुणी धीमान् धार्मिकतामयो हि यः ॥

वैष्णवो राघवं पश्येदेकाकिनमनेकधा ।
विश्वं तदीयकं भाव्यं सर्वत्र धर्मतः सुखम् ॥
रुच्या धर्मधुरीणाय कौशल्येयस्य नीलिमा ।
विमलः श्यामलो ध्येयो विधिना येनकेनचित् ॥

नामैव महिमन् श्रेष्ठं चाद्यतनं सनातनम् ।
धार्यं महद् हरेर्नाम महत्तरं महत्तमम् ॥

धातुरूपम्

(कृदन्तम्)

रामस्य चरितं दिव्यं पाठ्यं सर्वविधं जनैः ।
पठनीयं समासेन पठितव्यं सविस्तरम् ॥
पठिष्यन् पाठकः पाठं पाठं - पाठं प्रपूरयेत् ।
श्रद्धया पठितं चेद्धि पठितवान् सुखी भवेत् ॥

गुरुणा पाठ्यते चैव स्वयं पठति भाग्यवान् ।
पाठयति स्वकं वत्सं चैव तैः पठ्यते कथा ॥
गुरुणा पाठ्यमानश्च पठ्यमानं तथात्मना ।
सुपाठ्यं सुपठं कुर्यात् पिपठिषेत् जनः सदा ॥
कथां पापठ्यते भक्तः पठनीयति भूयशः ।
पठनं पाठनं कुर्वन् बोधयति परस्परम् ॥
पठितुं श्रद्धया गच्छेत् पठन् सन् श्रीहरिं स्मरेत् ।
आवर्तेत पठित्वेदं संपठ्य स्वं समुद्धरेत् ॥

(तिङन्तम्)

एकः पठति विद्वान् हि स्वल्पज्ञौ पठतश्च द्वौ ।
पठन्ति बहवः छात्राः प्रसृतं वचनान्तरम् ॥

परस्मैपदे (—पठ्)

(—प्रथमः पुरुषः)

रामः पपाठ त्रेतायां वेदं गुरुगृहं गतः ।
अपठद् ह्यः कथां भक्तः प्रागपठीद् विचक्षणः ॥
देवदत्तः पठत्यद्य ताञ्च रामायणीं कथाम् ।
बालः पठिष्यति ह्याशु पठिताग्रे नृसन्ततिः ॥
वृद्धः पठेद् विधिं दृष्ट्वा बालः पठतु चाज्ञया ।
शुभाशिषा युवा पठचात् पठतात् कामयेऽखिलः ॥
अविघ्नमभविष्यच्चेदपठिष्यत् स निश्चलः ।
भाग्येन लभ्यते जन्म वरेण पठ्यते कथा ॥

(—मध्यमः पुरुषः)

मन्ये जन्मान्तरे त्वञ्च पेठिथ श्रीहरेः कथाम् ।
अवश्यमेव त्वं चेह रामायणं पुराऽपठीः ॥
पूर्वे दिने तु बालेषु सुस्वरमपठस्तथा ।
पठस्यद्य कथां रम्यां त्वमेकाग्रतया त्विह ॥
शीघ्रमेव समारोहे पठिष्यसि कथां हरेः ।
ईदृष दिनान्तरे चैव विद्वत्सु पठितासि त्वम् ॥

एवमेव त्वनिर्विण्णः शान्त्या हरेः कथां पठ ।
युक्तमात्मप्रबोधाय त्वं पठेः वरदां कथाम् ॥
प्रेरयत्वीश्वरो यत्त्वं पठ्याः सर्वहिताय वै ।
अविघ्नमभविष्यच्चेदपठिष्यस्त्वमव्यथः ॥

(—उत्तमः पुरुषः)

बाढं हि पपठाहञ्च जन्मान्तरे हरेः कथाम् ।
निस्सन्देहो हि प्रागेव रामायणमपाठिषम् ॥
अद्यतनाद्धि प्रागेव चापठं बालक्रीडनम् ।
साम्प्रतं तु पठाम्यद्य रामविवाहवर्णनम् ॥

शीघ्रमेव पठिष्यामि रामसुग्रीवमित्रताम् ।
पठितास्मि ततश्चाहं राज्याभिषेकमङ्गलम् ॥
आदिष्टवाहं तां पठानि च निरन्तरम् ।
रामस्य चरितं दिव्यं पठेयं युक्तमेव तत् ॥

विदधातु कृपामीशः पाठ्यासं भक्तितः सदा ।
अविघ्नमभविष्यच्चेदपठिष्यं स्थिरं त्वहम् ॥

आत्मनेपदे (—वृत्)

(प्रथमः पुरुषः)

आत्मा हि ववृते चाग्रे निःसन्देहं युगात्पुरा ।
अवर्तत दिनात्पूर्वं चावर्तिष्टोदये रवेः ॥
स वर्तते समन्ताद्धि वर्तिष्यते त्वतः परम् ।
युगस्यास्यावशेषेऽपि वर्तिता स न संशयः ॥

देहदृष्ट्योचितं केह नरो वर्तेत धर्मतः ।
ईश्वरस्याशिषा सोऽपि वर्तिषीष्ट सुकर्मणि ॥
अनुरुद्धो मया चैवमनासक्तः स वर्तताम् ।
अविघ्नमभविष्यच्चेत् सोऽवर्तिष्यत निश्चलः ॥

(— मध्यमः पुरुषः)

त्वं हि ववृतिषे चाग्रे निस्सन्देहं युगात्पुरा ।
अवर्तथा दिनात्पूर्वं चावर्तिष्ठाः दिनोदये ॥
वर्तसे त्वं समन्ताद्धि वर्तिष्यसे त्वतः सरम् ।
युगस्यास्यावशेषेऽपि वर्तितासे न संशयः ॥
देहदृष्ट्योचितं यत्त्वं वर्तेथाः धर्महेतवे ।
शुभाशिषा सतां चैव वर्तीषीष्ठास्तु सत्पथे ॥
परामर्शोऽपि संघर्षे वर्तस्व निगतज्वरः ।
अविघ्नमभविष्यच्चेत्त्वमवर्तिष्यथाः स्थिरम् ॥

(—उत्तमः पुरुषः)

अहं हि ववृते चाग्रे निःसन्देहं युगात्पुरा ।
प्रागुदयादवर्तेऽहं चावर्तिष्युदये रवेः ॥
वर्तेऽधुना समन्ताद्धि वर्तिष्येऽहमतः परम् ।
युगस्यास्यावशेषेऽपि वर्तिताहे न संशयः ॥
देहदृष्टचोचितं चाहं वर्तेय धर्महेतवे ।
विधेयादीश्वरो यच्च धर्मेऽहं वर्तिषीय हि ॥
आदिष्टवानहं वर्ते त्वनासक्तः सुकर्मणि ।
अविघ्नमभविष्यच्चेदवर्तिष्ये स्थिरं त्वहम् ॥

(सोपसर्गसंज्ञा)

जीवनस्यामुखे ह्येव प्राज्ञः स्यादीशसम्मुखः ।
कर्तव्यविमुखो न स्यान्नसंघर्षपराङ्मुखः ॥
स विकासोन्मुखो जीवो यो धर्माभिमुखो भवेत् ।
देवेशः सुमुखो यस्य धराणां प्रमुखश्च सः ॥

(सोपसर्गधातुः)

यदा-यदा हि धर्मस्य ग्लानिर्भवति वै तदा ।
आविर्भवति देवश्च पराभवति दुर्जनम् ॥

अभिभवति विघ्नौघं परिभवति पातकम् ।
अनुभवन्ति जनाः सौख्यान् प्रभवति सुखं सताम् ॥
संभवति हरिश्चैवं विभवन्ति मनीषिणः ।
प्रादुर्भवति सद्धर्मस्तिरोभवत्यसत्तथा ॥

गणविकरणाः

(परस्मैपदे)

भवति भूयते भूतः भूत्वा भवितुमीदृशम् ।
शब् विकरणकाः गुण्याः भ्वादयः स्यु अ-धारकाः ॥
अत्ति चैवाद्यते जग्धः जग्ध्वा चात्तुं तथैव च ।
लुग्–विकरणकाः ज्ञेयः शून्यधृताः अदादयः ॥

जुहोति हूयते हुत्वा हुतः होतुं यथाक्रमम् ।
श्लुविकरणको द्वित्वी जुहोत्यादिश्च शून्यधृत् ॥
दीव्यति दीव्यते द्यूतः देवित्वा देवितुं तथा ।
श्यन्-विकरणसंयुक्ताः दिवादयो य-धारकाः ॥

सुनोति सूयते सुत्वा सुतः सोतुं यथाक्रमम् ।
श्नु-विकरणकाश्चैवं स्वादयःस्युर्नु-धारकाः ॥
तुदति तुद्यते तुन्नस्तुत्वा तोत्तुमिति क्रमात् ।
श-विकरणकाः ज्ञेयास्तुदादय अ - धारकाः ॥

रुणद्धि रुध्यते रुद्धः रुद्ध्वा रोद्धुमिति क्रमात् ।
श्नम्-विकरणसंयुक्ताः रुधादयो न-धारकाः ॥
तनोति च तनित्वा च तनितुं तत तन्यते ।
उ-विकरणकाश्चैवं तनादय उधारकाः ॥

क्रीणाति क्रीयते क्रीतः क्रीत्वा क्रेतुं यथाङ्किताः ।
श्ना-विकरणसंयुक्ताः ना-धृतः क्रयादयः स्मृताः ॥
चोर्यते चोरयत्येव चोरयित्वा च चोरितः ।
चोरयितुमिव स्वार्थणिजन्ताश्च चुरादयः ॥

गणविकरणाः (आत्मनेपदे)

वर्तते वर्त्स्यते वृत्त वृत्त्वा वर्तितुमीदृशम् ।
शब्-विकरणकाः गुण्याः भ्वादय आत्मनेपदे ॥
शयित शय्यते शेते शयित्वा शयितुं तत्क्रमम् ।
लुकविकरणकश्चैवमदादिरात्मनेपदे ॥

मीमीते मीयते मित्वा मितो मातुं तथेदृशम् ।
श्लु-विकरणको द्वित्वी जुहोत्याद्यात्मनेपदे ॥
बुद्ध्यते बुद्ध्यते बुद्ध बुद्ध्वा बोद्धुं तथाक्रमम् ।
श्यन्-विकरणसंयुक्तो दिवादिश्चात्मनेपदे ॥

सुनुते सूयते सुत्वा सुतः सोतुं यथाक्रमम् ।
श्नु-विकरणके स्वादौ स्यू रूपाण्यात्मनेपदे ॥
तुदते तुद्यते तुन्नस्तुत्त्वा तोत्तुमिति क्रमात् ।
श-विकरणसंयुक्ते तुदादौ चात्मने पदे ॥
रुन्धे च रुद्ध्यते रुद्ध रुद्ध्वा रोद्धुमिति क्रमात् ।
श्नम्-विकरणसंयुक्तो रुधादिश्चात्मने पदे ॥
तनुते च तनित्वा च तनितुं तत तन्यते ।
उ-विकरणश्चैव तनादिश्चात्मने पदे ॥

क्रीणीते क्रीयते क्रीतः क्रीत्वा क्रेतुं यथाङ्कितम् ।
श्ना-विकरणसंयुक्ताः क्रयादयश्चात्मने पदे ॥
चोरयते णिजन्तश्च चुरादिश्चात्मने पदे ।
चोरितश्चोरयित्वा च चोरयितुं च चोर्यते ॥

सन्धि-विचारः

सन्निधौ स्युर्गणाध्यक्षः शारदा कमलासना ।
ग्रहेन्द्रः सर्वभूतेशो नरोत्तम शुभोर्जितः ॥
देवर्षिर्मानवश्चैवं मिथो भावैक्यनन्दिताः ।
वनौषधिः सुखार्थाय हरेर्नाम भवौषधम् ॥

श्रीहर्यर्चा च हर्याज्ञा हरीच्छा च हरीशिता ।
हर्युक्तिश्चैव हर्यूर्जा हर्येकता च हर्यृचा ॥
हर्यैश्वर्यं च हर्योजो हर्मयौदार्यमिति क्रमात् ।
भान्वादयश्च शब्दास्तु सन्ध्यर्हाः स्युः शिशिक्षुभिः ॥

श्रीगुर्वर्चा च गुर्वाज्ञा गुर्विच्छा सद्धिताय हि ।
गुर्वीशिता गुरूक्तिश्च गुरुहा गुर्वृणं सरेत् ॥
गुर्वेकता सते स्याद्धि गुर्वैश्वर्यं तथैव च ।
गुर्वोज ऊर्ध्वमार्गत्वे गुर्वौदार्यमसक्तियुत् ॥

पित्रर्चा पूज्यपित्राज्ञा पित्रिच्छा सत्सुखाय वै ।
पित्रीशिता च पित्रुक्तिः पित्रूर्जिता स्वशक्तयः ॥
पितृणधारिता तस्मात् धार्या पित्रेकता सदा ।
पित्रैश्वर्यं च पित्रोजः पित्रौदार्यं महत् मतम् ॥

धर्मेऽर्थो धर्म आमुक्तिः धर्म इष्टिः धर्म ईश्वरः ।
धर्म उत्साहवृद्धिः स्यात् ऋतऊर्जा ऋतयुतम् ॥
धर्म एकत्वप्राप्तिः स्यात् धर्म ऐश्वर्यसाधनम् ।
धर्म ओजस्तु प्राप्तव्यः धर्म औचित्यमीरितम् ॥

गोऽर्चनं हि गवास्था च गाविष्टिश्च गवीक्षणम् ।
गवुत्सवः गवूर्जा च गवृणं च गवेषणम् ॥
गवैश्वर्यं गवोकश्च गवौदार्यमुदाहृतम् ।
तदंशुमान् तदात्मा च तदिन्द्रश्च तदीश्वरः ॥

तदुपेन्द्रस्तदूर्ध्वस्थः तट्टक् यजुश्च साम तत् ।
तदेको हि तदैक्यं च तदोङ्कारस्तदोषधम् ॥
तत्कृष्णस्तत्खरारिश्च तद्गुरुस्तद् धनेश्वरः ।
तनूङ्कारादयो वर्णाः, तच्चन्द्रस्तच्छबी रवेः ॥

तज्ज्योतिस्तज्ज्ञरो वै तट्टंकस्तट्टक्कुरः स्मृतः ।
तड्डयने च पक्षीशस्तड्ढुण्ढिराजरीरितः ॥

तत्तपः सर्वभूतत्थं तद्देवस्तद्धनुर्धरः ।
तन्नारायण उक्तश्च तत्पिता तत्फलाधिपः ॥
तद्ब्रह्मा चैव तद्भूभृत् तन्मातृका सुरेश्वरी ।
तद्योगेशश्च तद्रुद्रः तल्लक्ष्मी तद्विधायिनी ॥

तच्छं तत् षण्मुखो देवस्तद्धरिः सम्प्रकीर्तितः ।
रामोऽस्ति राम आस्ते च राम इच्छति शं नृणाम् ॥
श्रीराम ईक्षते सर्वान् राम उदेति पूर्णतः ।
राम ऊर्जास्ति लोकस्य राम ऋच्छति कोशले ॥

स राम एधते लोके राम ऐश्वर्यमेति च ।
राम ओजः प्रदाता च राम औदार्यशीलवान् ॥
रामः क्रीडति खेलं च रामो गच्छति वै वने ।
रामो घोषयते धर्मं रामश्चरति चाश्रमम् ॥

रामश्छादयते भक्तान् रामो जयति सर्वदा ।
रामष्टीका नृपाणां तु रामो डम्भयते चमूः ॥
श्रीरामस्तारयत्याशु रामो ददाति पात्रताम् ।
रामो नमति गुरून् सर्वान् राम≍पठति वै श्रुतीः ॥

रामो बाधते विघ्नान् रामो मुञ्चति चाश्रितान् ।
रामो याति वनं रामो रणे च लभते जयम् ॥
रामो विशत्ययोध्यायां रामश्शंसति वै सखीन् ।
रामष्षट्पदो भाति भक्तानां हृदयाम्बुजे ॥

रामः स्फुरति भावेन रामो हरति खल्वघान् ।
रामः क्षात्रगुणोपेतो रामस्त्राता भवार्णवात् ॥
रामो ज्ञानं रतिं दत्ते जना अचरिता मुदाः ।

सन्धिः

माहेश्वरैर्हि सूत्रैश्च प्रोद्घाट्य नियमा बुधैः ।
उदाहरणरीत्येह क्रमात् स्वल्पमुदीरितम् ॥

१. अइउण् । २. ऋलृक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । ६. लण् । ७. ञमङणनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् । ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् ।

इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि ।

स्वरसन्धिः

१. दीर्घसन्धिः

सवर्णे अचि परे चाको दीर्घादेशः सकृद्भवेत् ।
गणाध्यक्षो गिरीशश्च भानूदयस्तथैव च ॥
रामार्थाय रमार्थाय रामाज्ञया रमाज्ञया ।
गिरीशश्च भवानीशो हरोच्छया सुधीच्छया ॥

विधूदयो लघूर्मिश्च भूदूर्ध्वं भवेद् वधूत्सवः ।
अको दीर्घं सवर्णेऽचि चैवं पितृणमीरितम् ॥

२. यण्सन्धिः

इकः स्थाने च यण् स्याद्धि संहितायामचि त्विह ।
हर्यर्चनं च गुर्वाज्ञा पित्रादेशो यथाक्रमम् ॥

३. अयादिसन्धिः

क्रमादेचोऽयवायावश्च स्युरचि परे सति ।
शयनं भवनं चैव नायकः पावको यथा ॥

४. गुणसन्धिः

अचि परे ह्यवर्णात्तु स्यात् पूर्वपरयोर्गुणः ।
अदेङ् हि गुणसंज्ञः स्याद् योगेशः पुरुषर्षभः ॥

५ वृद्धिसन्धिः

स्यादादेचि परे वृद्धिरेकादेशः प्रतिष्ठितः ।
आदैच्च वृद्धिसंज्ञ स्यात् कृष्णैकता भवौषधम् ॥

६. पूर्वरूपसन्धिः

अन्त्यादेङोऽति पाश्चात्ये पूर्वरूपः प्रतिष्ठितः ।
यथा प्रयाणकालेऽपि हृष्टोऽन्तः दुःखहो भवेत् ॥

व्यञ्जनसन्धिः (हल्सन्धिः)

१. श्चुत्वसन्धिः (स्तोः श्चुनाश्चुः)

सकारस्य तवर्गस्य शकारश्च चवर्गतः।
शकारश्च चवर्गः स्तो योगे सच्चित् मनश्च तत् ॥

२. जश्त्वसन्धिः (झलां जश् झशि, झलां जशोऽन्ते)

झशि परे झलां जश् स्यात् पदान्तेऽपि झलां जशः।
बोद्धव्यं लब्धिवत् पूर्वं वागीशवदपरं तथा ॥

३. अनुनासिकसन्धिः (यरोऽनुनासिकेऽनुनासिको वा)

यरोऽनुनासिको वा स्यात् पदान्तस्यानुनासिके।
वाङ्मयं षण्मुखश्चैव चिन्मयस्तदुदाहृतम् ॥

४. चर्त्वसन्धिः (खरि च, झयो होऽन्यतरस्याम्)

ह्रस्थमुत्थानवच्च स्युः खरिपरे झलां चरः।
तद्धि पूर्वसवर्णः स्याज्झयः परस्य ह्स्य वा ॥

५. तोर्लि सन्धिः

तवर्गस्य लकारे च परसवर्ण उदीरितः।
तल्लीनतां बृहल्लीलां श्रद्धावांल्लभते भुवि ॥

६. ष्टुत्वसन्धिः (ष्टुनाष्टुः, चोः कुः)

ष्टुः स्याच्च स्तोः ष्टुना योगे दृष्टः प्रवेष्टितो यथा।
चवर्गस्य कवर्गः स्यात् पदान्ते झलि मुक्तवत् ॥

७. ङमुट्-सन्धिः (ङमो ह्रस्वादचि ङमुण्नित्यम्)

ह्रस्वात्परे ङमन्ताद्धि पदात्परस्य वै ह्यचः।
स्याद् ङमुडागमो नित्यं कुर्वन्नपि पदं यथा ॥

विसर्गसन्धिः

१. विसर्गसन्धिः (विसर्जनीयस्य सः)

खरि विसर्जनीयस्य सः स्याद् विकाररीतिशः।
विष्णुस्त्राता हरिश्चन्द्रो धनुष्टङ्कार उक्तयः ॥

२. रेफलोपसन्धिः (वा शरि, रोरि)

शरि विसर्जनीयो वा हरेश्शयः हरेः शयः ।
रेफे लोपस्तु रेफस्य धार्तराष्ट्रा रणे यथा ॥

३. यत्वसन्धिः (भोभगोअघो अपूर्वस्य योऽसि)

रोर्यादेशोऽशि भूयाद् भो अपूर्वस्य भगो अघो ।
यस्य लोपः हलि स्याच्च यच्छ्रेय एतयोर्यथा ॥

४. विसर्जनीयसन्धिः (खरवसानयोर्विसर्जनीयः)

पदान्तस्य रेफस्य विसर्गः स्यात् परे खरि ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

५. षत्वसन्धिः (इदुदुपधस्य चाप्रत्ययस्य)

अप्रत्ययविसर्गस्य स्यादिदुपधस्य षः ।
नैष्कर्म्यं निष्कृतिश्चैव धनुष्पाणिरुदाहृताः ॥

समासः

व्यासे पृथक्-पृथक् चैव समग्रपददर्शनम् ।
समासे लाघवार्थं च ह्यंशलोपो भवेत् क्वचित् ॥
द्वन्द्वे सर्वांशप्राधान्यं समुच्चयाङ्कलोपनम् ।
रामश्च लक्ष्मणश्चेति स्तो रामलक्ष्मणौ त्विह ॥
तत्पुरुषे परो मुख्यः मध्ये विभक्त्यदर्शनम् ।
पुरुषेषूत्तमश्चेति शब्दितः पुरुषोत्तमः ॥
दशरथात्मजः प्रोक्तौ दशरथस्य चात्मजः ।
अरण्यमागतश्चेति स्यादारण्यागतः स्मृतः ॥
इच्छा च विजयाय स्यात् विजयेच्छा प्रकीर्तिता ।
वात्सल्येन जितो वीरः स वात्सल्यजितः स्मृतः ॥
कर्मधारयवैशिष्यात् स्मितमुखं स्मितं मुखम् ।
प्रोक्तः पुरुषसिंहश्च सिंह इव हि पूरुषः ॥
भुवनानां त्रयाणां यः समाहारो द्विगुस्थितः ।
त्रिभुवनं भवत्येवं स्यात् संख्यापूर्वके द्विगुः ॥

बहुव्रीहिसमासे स्यात् चान्यार्थस्य प्रधानता।
दीर्घौ बाहू हि यस्य स्तो दीर्घबाहु-र्हरिः स्मृतः॥
अव्ययीभावयुक्ते च पूर्वशब्दप्रधानता।
चक्रेण युगपद् विष्णुः सचक्रं वर्तयेदिति॥

वाच्य-परिवर्तनम्

पूर्वस्थः पाठः (तिङन्तेन)

बालः पठति पाठं स्वं पाठः बालेन पाठ्यते।
अहं बालमपश्यं तं बालोऽदृश्यत वै मया॥
स्वगृहं गम्यते तेन ह्येकं फलं च खाद्यते।
खाद्येते द्वे फले तेन खाद्यन्ते सुफलानि च॥
श्यामो भृत्यं गृहं स्वीयं गमयतीति कर्तृके।
भृत्यः श्यामेन च ग्रामं गम्यते कर्मवाच्यके॥
अयाचत ऋषी राम तेन रामो ह्ययाच्यत।
विश्वामित्रेण श्रीरामं दशरथो ह्ययाच्यत॥

विभाषया—(कृदन्तेन)

सा पठितवती पाठं पाठो वा पठितस्तया।
प्रस्थितवानहं चैवं वाच्यं तु प्रस्थितं मया॥
ऋषिर्याचितवान् रामं तेन रामो हि याचितः।
नरेशो याचितो रामं विश्वामित्रेण संस्कृतम्॥

उत्तरस्थः पाठः

कर्तृकर्म च भावश्च वाच्यास्त्रयस्तु संस्कृते।
तत्राकर्मकधातोस्तु रूपो न कर्मवाच्यके॥
विभक्तिः प्रथमा यस्मिन् क्रिया तदनुसारिणी।
सा स्याद्वाच्यानुसारेण कर्तरि चैव कर्मणि॥
कर्तृवाच्यात् क्रिया यत्र कर्मवाच्यं तु नीयते।
तृतीया कर्तरि योज्या कर्मणि प्रथमा तथा॥
क्रियया यत्र चाभीष्टं केवलं भावबोधनम्।
भाववाच्ये क्रिया कार्याऽन्यपुरुषैकवाचिका॥

भावे कर्मणि वाच्ये च रूपं स्यादात्मनेपदम् ।
पठ्यते बालकेनोच्चैरुच्चैः पठति बालकः ॥
भावे कर्मणि वाच्ये च यक् सार्वधातुके भवेत् ।
गम्यते गम्येतां गम्यतागम्यत चतुष्टयम् ॥

प्रेरणार्थकाः

पूर्वस्थः पाठः

बालः पठति पाठं तं बालं पाठयते गुरुः ।
बालं पाठ्यते पाठं गुरुणैवाभिभावकः ॥
रमयति शिशुं दृश्यैः शत्रून् दमयते भटः ।
जनयति न कस्यापि दुःखं श्रेष्ठो कदाचन ॥
बुद्धिमान् पठने कालं यापयति दिने दिने ।
दापयति नृपेणैव दानं च सज्जनो मुदा ॥
पाययति शिशुं दुग्धं विश्वं पालयते हरिः ।
अध्यापयति छात्रं च वेदं वाचयते गुरुः ॥
सज्जनाद् दूषयन्त्येव घातयन्ति पशून् खलाः ।
धीमद्भिः पाठ्यते बालो विज्ञैः सिद्धिश्च लभ्यते ॥

उत्तरस्यः पाठः

कार्यं तु कारयत्येव यदान्येन प्रयोजकः ।
धातो रूपं तदा योज्यं णिजन्तं प्रेरणार्थकम् ॥
णिजन्ताः धातवः सर्वे उभयपदिनस्तथा ।
भवतिवत् परस्मै स्युः सेवतेवत् तथात्मने ॥
अन्त्येकश्च स्वरस्यात्र वृद्धिरयादिसन्धियुत् ।
अकारस्योपधास्थस्य वृद्धिर्णिचि तथा भवेत् ॥
उपधावर्तिनः स्याद्धि गुणो ह्रस्वस्वरस्य च ।
पाठं च पाठयत्याशु लेखयति गुरुर्यथा ॥
कर्तरि मूलधातोस्तु तृतीया प्रेरणागमे ।
नृपो भृत्येन कार्याणि कारयति न संशयः ॥

गतिप्रत्ययवसानार्थे द्वितीया योजयेत् मतौ।
पुत्रमन्नं यथामाता भोजयति सुहर्षिता॥

यथात्मने णिजन्तश्च स्यात् परस्मैपदे तथा।
दर्शयति यथा प्रोक्तं दर्शयते तथेरितम्॥
इकारस्यैव चान्तस्य धातोर्णिजन्तकस्य हि।
भावे कर्मणि लोपः स्यात् पाठ्यते कार्यते यथा॥

गम्रम् क्रम्नम् तथा शमदम् जन् त्वर् घट् व्यय् पदादिषु।
अकारस्योपधास्थस्य णिचि वृद्धिश्च बाध्यते॥
आकारान्तस्य धातोस्तु णिच् स्यात् पकारपूर्वकः।
स्थापयति यथा, किन्तु पाययति तत्समम्॥

चुरादिगणधातोस्तु रूपं णिचि भवेत् समम्।
गणयति च सा कन्या गणयति गुरुस्तया॥

स्त्रीप्रत्ययाः

उदाहरणमात्रं हि बालः प्राक् च पठेत् सुखम्।
सूत्रांशस्येह निर्देशः पश्चादर्थाय केवलम्॥
टाप् डाप् चाप् ङीप् च ङीन् ङीषूङिति स्त्रीप्रत्ययाः स्मृताः
योज्या अनित्यलिङ्गार्थं हि स्त्रीत्वार्थं च संस्कृते॥

अजादौ च ह्यकारान्ते स्त्रीत्वार्थं टाप् नियोजयेत्।
अजा बाला कृशा वत्सा मूषिका चटका यथा॥
पूर्वस्यात् प्रत्ययस्थात् कात् तन्नेदप्यसुपो भवेत्।
यथा च बालिका ज्ञेया वर्जयित्वाष्टकादिकान्॥

जातौ जातेरन्ताङ्ङीष् नाजादेः तत्र तद् भवेत्।
यथा हंसी कुरङ्गी च वर्जिताः कोकिलादयः॥
स्त्रीत्वार्थमूङ् नियोज्यः स्यात्तुदन्ताच्च यथा कुरुः।
न रज्वादेर्यथा रज्जुः जानुर्हनुः कमण्डलुः॥

लिङ्गानुशासनम्

प्रत्ययान्तस्य शब्दस्य चान्त्यवर्णक्रमेण हि ।
लिङ्गानुशासनं स्वल्पं बालबोधाय कथ्यते ॥
सामान्याः नियमा एते शिक्षारम्भोपकारकाः ।
नोक्ता अत्रापवादाश्च तेऽग्रे योज्या बुधैरिह ॥

स्त्रीलिङ्गाधिकारः

स्त्रियां तल्प्रत्ययान्ताश्च शुक्लता विप्रता यथा ।
टाप्ङ्न्ताः यथा विद्या शोभा मेधा कुरुस्तथा ॥
क्तिन्नन्तस्तु यथा भक्तिः वर्ज्य जातिः भवेत् स्त्रियाम् ।
मिन्यन्तास्तु यथा भूमिः वर्ज्यं वह्निश्च पुंसि सः ॥
ऋन्तमेकाक्षरं चैव यथा श्रीः भूः भवेत् स्त्रियाम् ।
ईकारान्ता यथा गौरी लक्ष्मी देवी नदी यथा ॥
समाहारद्विगूक्तौ च ह्युकारः ईप्युतः स्त्रियाम् ।
पंचवटीत्रिलोकीवत् पात्राद्यन्ताहृते भवेत् ॥
दुहिता मातरो स्त्रीत्वे स्वसृयातृननान्दरः ।
ऋकारान्ताश्च पञ्चैते तथा प्रतिपादादयः ॥
विद्युद्वल्लीनिशावीणादिग्भ्रूह्रीसरिदादयः ।
आविंशति नवत्यन्ताः स्युः संख्यावाचकाः स्त्रियाम् ॥

पुल्लिङ्गाधिकारः

घञ्जब्धाच्प्रत्ययान्तास्तु यथा भावो भवो जयः ।
भवेयुः पुंसि वै वर्ज्यं क्लीबं भयं मुखादिकम् ॥
इत्थं पाकः करस्त्यागो विस्तरो गोचरो गरः ।
विनयः संचयः पुंसि चय इत्यादयः स्मृताः ॥
नकारान्ता यथा राजन् चात्मन् पुंसि ह्यूदाहृताः ।
वर्ज्यं मन्प्रत्ययान्ताश्च यथा कर्मन् नपुंसकम् ॥
कि-नङ्न्ताः निधिः प्रश्नः शब्दाश्च देववाचकाः ।
बलिः करस्तथा पुंसि सेमनज् महिमादयः ॥

उकारान्तो भवेत् पुंसि प्रायो यथा विभुः प्रभुः ।
वर्ज्यं धेनुः तनुः रज्जू रेण्वादयश्च ते स्त्रियाम् ॥
पुल्लिङ्गे स्युरकारान्ताः क-ट-ण-थोपधास्तथा ।
न-प-भ-मोपधाश्चैव य-र-ष-सोपधाश्च ये ॥

इत्थमुदाहृताः पुंसि कल्कश्च स्तवको घटः ।
गुणो गणश्च पाषाणो रघो ग्रन्थ इनस्तथा ॥
फेनो दीपश्च सर्पश्च स्तम्भः सोमो हयः क्षुरः ।
अङ्कुरश्च वृषो वृक्षो वत्सश्च वायसस्तथा ॥

पुंसि गण्डः करो दन्त ओष्ठः कण्ठो नखः स्तनः ।
प्रायस्तदर्थकाश्चापि वर्जयित्वा च दीधितिः ॥
अक्षता आसवो दारा लाजा नित्यं तथैव हि ।
स्युर्बहुवचनान्तश्च पुल्लिङ्ग्यैव प्रकीर्तितः ॥

स्वर्गो यागो गिरिर्मेघश्चाब्धिर्दुसमयो ह्यसिः ।
शरः शत्रु सपर्यायाः पुंसि वर्ज्यंदिवादयः ॥
तत्र त्रिविष्टपं चाभ्रं स्तः केवलं नपुंसके ।
स्त्री-पुंसोः स्यादिषुः शब्दः स्वर्गार्थकः स्वरव्यये ॥

ऋतुर्मासो रसो वर्णः शब्दो वायुरहिर्नरः ।
अग्निस्तदर्थकाः पुंसि किन्तु वर्षाशरत् स्त्रियाम् ॥

नपुंसकलिङ्गाधिकारः

क्लीबे भावे ल्युडन्ताः स्युः यथा ज्ञानं च भाषणम् ।
भावे निष्ठा तदन्ताश्च गीतं च हसितं यथा ॥
त्व-ष्यञौ तद्धितौ क्लीबे शुक्लत्वं शैल्यमीदृशम् ।
प्राण्यङ्गे द्वन्द्व एकत्वं पाणिपादं यथेरितम् ॥

इसुसन्ताः यथा सर्पिः हविः धनुः नपुंसके ।
न वाच्यार्चिः चद्धिस्तत्र चेयंवार्चिः छदिस्त्रियाम् ॥
क्लीबे स्युः लोपधाः शब्दाः कुशलं च स्थलं यथा ।
न तालस्तरलश्चैवं शीलः शीलं तलस्तलम् ॥

थद्यढग्यगजण्वुच्छसंयुक्ता भावकर्मणि ।
क्लीवे सन्ति यथा सख्यं हसनं शायितं तथा ॥
शुक्लत्वं चाधिपत्यं च शोक्त्यं द्वैहायनं च वै ।
पितापुत्रकमौष्ट्रं च स्तेयं कापेयमीदृशम् ॥

क्लीवे द्वयच्कः ह्यसन्तः स्यात् यथा यशो मनस्तपः ।
उष्भावान्तो धनुष्वक्च त्विष्भागान्तो हविष्यथा ॥
अन्भागान्ताः यथा नामन् चर्वनर्वन् नपुंसके ।
तत्रैवाचिष् स्त्रियां स्याद्धि वेधसः पुंसि भवेत्तथा ॥

क्लीवे च डयट्तयप्युक्ताः नृदेव्यं द्वितयं यथा ।
त्रसन्ताश्च यथा पात्रं वज्र्यं छात्रादयस्तथा ॥
शब्दानपुंसके स्युस्ते ये न पुंसि न च स्त्रियाम् ।
यथा वृन्दमरण्यं खं पर्णं श्वभ्रं हिमं जल ॥

मांसं च रुधिरं चैव शीतमुष्णं बलं हलम् ।
द्रविणमक्षि मुखं शुल्बं लोहं दुःखं सुखं तथा ॥
शुभाशुभे च पुष्पं च लवणमनुलेपनम् ।
एते शब्दास्तथा प्रायस्तदर्थकाः नपुंसके ॥

तत्रैवावटवी प्रीतिः मुद्दृश् वया शुषिस्तथा ।
दृष्टिश्च मिहिका ज्ञेयाः न क्लीबेऽपि तु ते स्त्रियाम् ॥

उभयलिङ्गाधिकारः

पुं-स्त्रीलिङ्गाधिकारः

गोमणियष्टिमुष्टयादिः त्रुटिर्मांसमरीचयः ।
स्त्रीपुंसो स्युस्तथा वस्तिः पाटलिश्चैव शाल्मलिः ॥
उर्मिर्मृत्युस्तिथिर्बाहू रेणुः श्रोणिरिषुस्तथा ।
अपत्यतद्धितान्ताश्च स्त्रीपुंसोस्तु विशेषतः ॥

पुन्नपुंसकाधिकारः

ऐरावतो धृतो भूतः मुस्तो बुतश्च लोहितः ।
पुन्नपुंसकयोः ज्ञेया श्वेलितः पुस्तकस्तथा ॥
शीलं मूलं तलं शूलं मङ्गलं कुशलं तथा ।
ब्रह्मन् सूत्रं पवित्रं च पात्रं पुंसि नपुंसके ॥

रामो यद्धि पपाठ स्वेन गुरुणा लोकाय शिक्षाशयात् ।
सूर्यस्याभ्युदयेऽपठीच्च सुकृती प्राक्चापठत् पूर्वजः ॥
विद्येच्छुश्च पठिष्यतीह पठिता चाऽग्रेऽपि भावीजनः ।
सद्यो वै पठतीति पाठकसुधीधार्यं तदेकाक्षरम् ॥